| अथोपपातकानि। | प्रायश्चित्तानि। | तदशक्तौ धेनुदानम्। | तदशक्तौ चूर्णीदानम्। | दक्षिणा। |
|---|---|---|---|---|
| निन्दितदेशगमनम्। तत्तु तीर्थयात्राव्यतिरेकेण। निन्दितदेशा यथा। कारस्करकलिङ्गोड्रान्ध्रशबरयुगन्धरभूमिलयसिन्धुसौराष्ट्रसौवीरप्रत्यन्तदेशाङ्गवङ्गकलिङ्गादयः। | एतान् गत्वा तत्रैव चिरमुषित्वा गङ्गादिगमनम्।<br>तदशक्तौ पुनरुपनयनम्। | | | |
| | अतिचिरवासे पुनरुपनयनं चान्द्रायणञ्च। | सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः। | २२॥० कार्षापणाः। | यथाशक्ति। |
| असत्याभिधानम्। | सकृदसत्यभाषणे शक्त्यानुसरणम्। | | | |
| | अत्यन्ताभ्यासे तप्तकृच्छ्रम्। | ४ धेनवः। | १२ कार्षापणाः। | यथाशक्ति। |
| | अतिबहुतरकालाभ्यासे माससाध्यचान्द्रायणम्। | सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः। | २२॥० कार्षापणाः। | यथाशक्ति। |
| | साक्षिणोऽसत्यभाषणे ज्ञानाज्ञानतो द्वादशवार्षिकव्रतमित्युक्तमनुपातके।<br>विवाहभयमैथुनबालप्रतारणपरीहासगोब्राह्मणहितस्त्रीराजस्वप्राणात्ययसर्व्वधनापहारविषयेषु मिथ्याकथने दोषाभावः। | | | |
| उच्छिष्टस्य चाण्डालादिदर्शनम्। | दर्शने एकरात्रोपवासः। | ० | ॥० पणाः। | यथाशक्ति। |
| | सम्भाषणे द्विरात्रोपवासः। | ० | १ कार्षापणः। | यथाशक्ति। |
| | संस्पर्शे त्रिरात्रोपवासः। | ० | १॥० कार्षापणः। | यथाशक्ति। |
| | सहगमने सचेलस्नानम्। अनुच्छिष्टस्य दर्शने सूर्य्यादिदर्शनम्। सम्भाषणे ब्राह्मणसम्भाषणम्। इदं ज्ञाने। | | | |
| उच्छिष्टस्य सूर्य्यादिदर्शनम्। आदिना नक्षत्रचन्द्रौ। कामत इदम्। | एकोपवासः। | ० | ६ रक्तिकरजतम्। | यथाशक्ति। |
| तैलाभ्यक्तादिमूत्रोच्चारसमुत्सर्गः। आदिना अनाचान्तश्मश्रुकर्म्मिमैथुनिनः। | एकोपवासः। | ० | ॥० पणाः। | यथाशक्ति। |
| विप्राग्न्यादिमध्यगमनम्। आदिना दम्पतीगवोर्मध्यम्। | कामतोऽत्यन्ताभ्यासे चान्द्रायणम्। | सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः। | २२॥० कार्षापणाः। | यथाशक्ति। |
| | सकृदभ्यासादिषु तु स्नातकव्रतलोपप्रायश्चित्तम्। एकदिनाभोजनम्।<br>तदावृत्तिश्चोहनीया। | ० | ॥० पणाः। | यथाशक्ति। |
| अग्नौ पादप्रतापनम्। कुशेन पादसम्मार्जनञ्च। | एकोपवासः। इदं सकृत्करणे।<br>अभ्यासे द्वैगुण्यादिकम्। | ० | ॥० पणाः। | यथाशक्ति। |
| गुरोर्ब्राह्मणस्य च तिरस्कारः। | दर्पेण हुङ्कारे त्वङ्कारे वादेन जये वाससा बन्धने तृणेन ताड़ने च क्षिप्रं प्रसाद्य दिनमेकमुपवासः।<br>एतदीयत्संरम्भतः सकृज्ज्ञेयम्। | ० | ॥० पणाः। | यथाशक्ति। |
| | शास्त्रीयविवादे दर्पात् पुनः पुनर्जये स्नात्वा प्रणिपत्य त्रिरात्रोपवासः। | ० | १॥० कार्षापणः। | यथाशक्ति। |
| | प्रमादतः पादेन स्पर्शे एकरात्रोपवासः अभिवादनं प्रसादनञ्च। | ० | ॥० पणाः। | यथाशक्ति। |
| | क्रोधादिना अनुबन्धापेक्षया त्र्यहप्राजापत्यादिकं कल्प्यम्। | | | |
| | महापातकेन ब्राह्मणस्य विरुद्धाभिधाने कृच्छ्रातिकृच्छ्रम्। | ५ धेनवः। | १५ कार्षापणाः। | यथाशक्ति। |